# द्वौ सखायौ

पूर्वं चोलदेशे द्वौ सखायायावास्ताम्। तयोरेकोविद्याप्रियः, अन्यो धनप्रियः। तयोः पितरौ अतीव दरिद्रौ। अतस्तौ पित्रोराज्ञया विदेशं गतौ।

विद्याप्रियस्तत्र विद्यालयं प्रविश्य विद्यामधीतवान्। अन्यः कस्यापि श्रेष्ठिनः आपणे व्यापृतः प्रभूतं वित्तमर्जति स्म।

दशभ्यो वर्षेभ्यः परं तौ स्वदेशं प्रति प्रस्थितौ। वनमार्गेण गच्छतोस्तयोः धनप्रियस्य धनभाण्डं चोराः अपाहरन्। तेन स निर्धनो जातः।

यदा तौ स्वदेशमागतौ तदा विद्याप्रियं कृतविद्यं वीक्ष्य तद्देशीयो राजा तं मन्त्रिपदे न्ययोजयत्। धनप्रियस्तु जीविकार्थं गत्यन्तरम् अपश्यन् तस्यैव मन्त्रिणः सेवकोऽभवत्। विद्याया माहात्म्यं पश्यत। अत एव 'विद्याधनं सर्वधनात् प्रधानम्' इति लोका आहुः।